(*on* i. 1. 5)

**अनुत्पत्य** (an-utpatya) *ger.* not having flown स तद्विनाशसंत्रासादनुत्पत्य (v.l. °दनुत्पत्य) खगाधिपः। शाखामास्येन जग्राह तेषामेवान्ववेक्षया MahāBhā. i. 26.3.

**अनुत्पत्स्यमानजातीय** (anutpatsyamāna-jātīya) *adj.* [P. v. 3. 69] belonging to a class of those who are not going to be born न ह्यनुत्पन्नजातीयमनुत्पत्स्यमानजातीयं वा कार्यमस्ति TattvCin. iii. 38.2.

**अनुत्पद्** (an-utpad-) IV. Ā. (*caus.*) not to produce अस्य रेतः प्रजामनुत्पादयति तस्मान्मोघवीर्यं भवति PārāSū. 85.29.

**अनुत्पद्य** (an-utpadya) *ger.* not having taken birth अजनित्वा देवभावेनानुत्पद्येत्यर्थः VedāntKa. 440.16 (*on* iii. 3.27)

**अनुत्पद्यमान** (an-utpadyamāna) *adj.* **1** not arising अर्थज्ञानम् अनुत्पद्यमानं तु निमित्तान्तराधीनजन्मानमात्मानमावेदयति SphoṭSi. 123.2; उत्तरं तु पूर्वज्ञानबाधमन्तरेणानुत्पद्यमानं तस्य बाधकं भवति YuktiSneha. 23. 20 (*on* i. 1.2); **2** not being born, not coming into being अनुत्पद्यमानेऽपि पुत्रे पुत्रकाम्यादिकर्मणा तदुत्पत्तौ यत्नः कर्तव्य इत्यभिप्रायः TaiUBh. 216.8 (*on* 1.11); PrakaPañ. 367. 12; अभवन्नपि अनुत्पद्यमानोऽपि शरीरनिर्वृत्त्यर्थमित्यर्थः BālaKrī. ii. 33.7 (*on* 3.70); कामोऽनुत्पद्यमानोऽङ्गलीलालक्षणाद् विचेष्टितादुपजायते AbhinBhā. iii. 197. 9 (*on* 22. 158); **3** not emerging कर्महेतोस्संयोगविभागावनुत्पद्यमानौ … कर्मानुमापयतः PrakaPañ. 217.21; **4** not appearing अनुत्पद्यमानस्य चात्मनो ज्ञप्तिक्रियासद्भावेऽपि न खलु क्रियाफलभूतो बन्धः सिध्येत् TattvPradī (A.) 68. 5 (*on* 1.52)

**अनुत्पद्यमानत्व** (anutpadyamāna-tva) *n.* **I** the state of being that which is not originating तदव्यक्तं क्वचिन्न लीयते। कस्मादनुत्पद्यमानत्वात् TattvSa. 128. 10; **II** the state of being that which is not arising स्मरणमनाकलितरजतस्यानुत्पद्यमानत्वात् NyāyMa. 62. 2.

**अनुत्पन्न** (an-utpanna) *adj.* [*f.* -ā] **1** not originated, not come into being or existence, not born सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत् TejoBiU. 6.58; 6. 63; 6. 71; MahāU. 5.58; नानुत्पन्नेषु दैवेषु राज्ञां शान्तिर्विधीयते AVPari. 72(3).1; अकरोत्पुत्रकामस्तु मनुरिष्टिं प्रजापतिः।… अनुत्पन्नेषु नवसु पुत्रेषु HariVaṁ. 9.3; BrahmP. 7.4; न ह्यनुत्पन्नस्य द्रव्यस्योत्तरार्धो भवति ŚābaBh. 1214.25 (*on* iv. 1. 29); 1396.26 (*on* vi. 2.13); अनुत्पन्नयोर्धर्माधर्मयोरनुत्पादेन (दुःखस्य हानिर्भवति) NyāyVār. 2.17 (*on* i. 1.1); आदिशान्ता ह्यनुत्पन्नाः प्रकृत्यैव …। सर्वे धर्माः GauḍKā. 4.93; मूले (अनुमानस्य) तस्य ह्यनुत्पन्ने पूर्वेण विषयो हृतः ŚlokaVār. 5(4).58 (363. 3); 5(2).187 (263.2); 5(15).49 (651. 7); अनुत्पन्ने पुत्रे अपुत्रो देवदत्तः MuṇḍUBh. 326. 17 (*on* ii. 1. 2); अनुत्पन्नस्याभिधानानुपपत्तेः न ह्यजाते पुत्रे नामधेयकरणम् NyāyMañ. i. 317. 17; अनुत्पन्नमहीनं च जगदुत्पत्तिहानिभिः TaiUBhāVā. 197. 16(3); अनुत्पन्ना च व्यक्तिरिति कावतिष्ठतामाकृतिः PrakaPañ. 70. 3; (अर्थज्ञाने) अनवभासमाने उत्पन्नानुत्पन्नयोरविशेषात् PrakaPañ. 188. 5; कस्यांचित् क्रियायां भावानामन्योऽन्यप्रतियोगित्वं सहार्थ इति चेन्न। अनुत्पन्नस्थितनिरुद्धानामन्योऽन्यप्रतियोगित्वाभावात् NyāyKa. 64. 19; अनुत्पन्नस्यासतो जनकत्वायोगात् Kāśi. ii. 87. 13 (*on* 5(2). 187); अशब्द इति …। अनुत्पन्नो विनष्टोऽत्यन्तासन्नित्यत्राप्यभावत्रयेऽपि विवक्षितविपरीतमापद्यते NyāyVārPari. 558. 7; अनुत्पन्ने कार्तिकेये चिरकालरहोगते। महेश्वरे भवान्या च त्रस्ता देवाः समागताः। अग्निम् BrahmP. 128.7; जागती द्रष्टृदृश्यश्रीरहं त्वमितिरूपिणी। अनुत्पन्नैवोत्थितेव यत्रेति परिवर्ण्यते YogVā. ii. 17.16; iii. 4. 77; iii. 26.55; तुषोपवापे कपालोपादानं पुरोडाशप्रयुक्तम्। तत्र तदलाभेऽनुत्पन्ने नानुपात्तेन च क्रियानुष्ठानासंभवात् TantrRa. 86. 2; फलमनुत्पन्नं न स्वरूपेण विशेषणीभवितुमर्हति NyāyRaMā. 104. 26; सत्कार्यवादिनो हि अनुत्पन्नानामिव विनष्टानामपि (कर्मणाम्) शक्त्यात्मनावस्थानमेवेष्टम् NyāyRa. 665.19 (*on* 5(15).92); अनुत्पन्नस्य क्षणस्य क्रियाश्रयत्वायोगात् ŚāstrDī. 69.15 (*on* i. 1.5); 125. 31 (*on* i. 1. 5); अनुत्पन्ननिरन्वयध्वस्तयोरविशेषात् अतिशयमप्यादधानः स्वसमानाश्रयमेवादधीत Kiraṇā. 129.19; औरसेऽनुत्पन्ने क्षेत्रज उभयोः पित्रोः सकलमेव रिक्थं गृह्णाति Aparā. 733.16 (*on* 2. 127); 1006.13 (*on* 3.152); अनुत्पन्ने साधनाङ्गे हेतुवृत्तेरभावतः। भागासिद्धिः प्रसङ्गः स्यात् TārkiRa. 278. 9; न च प्रकाश्यादात्मलाभ एव प्रकाशकस्य प्रकाशकत्वम्, प्रदीपादेर्घटादिभ्योऽनुत्पन्नस्यापि तत्प्रकाशकत्वदर्शनात् PramāMī. 20. 6 (*on* i. 1.25); 61. 1 (*on* ii. 1. 29); केनचिदुत्पाद्यन्ते उत्सीदन्ति च। यानि शास्त्राणि। अर्वाक्कालिकतया वेदादनुत्पन्नाद्विनाशिनश्चार्वाचीनतया ManvaVi. 1524. 17 (*on* 12.96); प्रयोजकव्यापारविधानाशक्तेः प्रयोगवचनेन वानुत्पन्नस्य प्रयोगासंभवादुत्पत्तिरप्याक्षिप्यते NyāySu.(So.) 48.28 (*on* i. 2. 7); घटक्षणः स्वसमकालमुत्तरं कार्यमुत्पादयति, अनुत्पन्नो वा, विनष्टो वा VedāntKau. 194. 17 (*on* ii. 2.20); अर्थो ज्ञानग्राह्यो भवन्नुत्पन्नो भवति अनुत्पन्नो वा … नापरः। अनुत्पन्नस्यासत्त्वात् SarvaDaSaṁ. 2.185; नन्वेषां चतुर्विंशतितत्त्वानामसंसृष्टत्वं नाम यद्येकदेशेनोत्पत्तिः, तर्ह्यनुत्पन्नस्यासत्त्वादुत्पन्नमेव तत्त्वम् TattvSaṁkhyāṬ. 51.4; ननु कथं प्राणादनुत्पन्नस्य मनसः प्राणे लयः TattvPrakā. 207B. 1 (*on* iv. 2.3); आदिपदेनानुत्पन्नस्य कारकत्व गृह्यते NyāySu.(Ja.) 380A. 9 (*on* ii. 2 6); अभूतमनुत्पन्नं स्फोटादिभूतस्य मन्त्रपाठस्य लिङ्गम् Upask. 147.8 (*on* iii. 1.11); यज्ञदत्तस्य ज्ञाने सुखादौ वानुत्पन्ने … ज्ञानादिकं विषयो भवति Upask. 186 7 (*on* iii. 2.17); अमन्यत भूपोऽसावनुत्पन्नानिवापरान् (पुत्रान्) KathāKau. 4. 87; न तु तत्प्रत्यक्षम्। अनुत्पन्नस्याविद्यमानस्य प्रत्यक्षत्वायोगात् ŚivārkaMaDī. ii. 80.21 (*on* ii 2. 17); अनुत्पन्नस्य कर्मणः शेषाम्नानासंभवेन MayūMāli. 426. 12 (*on* v. 2.8); अनुत्पन्नस्य … कीर्तनजनकत्वायोगात नामाभिव्यञ्जककीर्तनेनेष्टं भावयेत् LalitāSaBh. 10.30 (*on* 20); **2** not effectuated, not resulted अनुत्पन्ने च कार्यार्थे मां त्वं व्याहृतवानसि। तस्मात् त्वमपि न स्वर्गं गमिष्यसि मया विना MahāBhā. vii. App. I. 8(295); अनुत्पन्नं कार्यं कारणासद्भावे लिङ्गम् PadārthaSaṁ. 225.15; अव्ययादुत्पन्नानां सुपां लुग्वचनम्। न ह्यनुत्पन्नानां लुगुपपद्यते Nyās. i. 277. 23 (*on* i. 4. 21); **3** not originated as yet (implying future origination) अनुत्पन्नेषु वाक्येषु चोद्यमाना सिसृक्षया। किं नु पूर्वं ततो देवी व्याजहार सरस्वती MahāBhā. xiv. 21.19; कथमनुत्पन्नम् …। अनागतमसंस्कृतं चानुत्पन्नम् AbhidhSa. 20. 8; यत् किं चिद्रूपमतीतानागतप्रत्युत्पन्नम् …। अनागतमनुत्पन्नम् AbhidhKoBh. 13.7 (*on* 1.20); द्रव्यम् … अनुत्पन्नोपरतक्रियं पुनरक्रियम् NyāyBh. 56. 3 (*on* i. 1.41); न हि प्राक्प्रध्वंसाभावाभ्यां भावः संबध्यत इति। अनुत्पन्नविनष्टयोश्च प्रसङ्गात् NyāyVār. 283. 19 (*on* i. 2. 12); पूर्वक्षणैरनुत्पन्नो वास्यते नोत्तरः क्षणः ŚlokaVār. 5(2). 182 (261.4); यदा संयमं करोति तदा यत्किंचिदनुत्पन्नमतिक्रान्तं तत्सर्वं योगी जानाति RājMār. 48.16; शरीरसंबन्धो बन्धः, तदभावो मोक्षः, तेन निष्पन्नानां देहानां यः प्रध्वंसाभावः यश्चानुत्पन्नानां प्रागभावः स मोक्षः NyāyRa. 670. 19 (*on* 5(15).106); न केवलमुत्पन्नपापस्य नाशोऽनुत्पन्नस्याप्यनुत्पादः ManvaVi. 1459. 2 (*on* 11. 230); **4** not applied or not appearing (during the process of word-formation) नानुत्पन्ने सनि प्रक्लृप्त्या भवितव्यम् MahāBh. i. 175. 10 (*on* i. 1. 66-67); विषयभूतेऽनुत्पन्न एव। बुद्धिस्थ इत्यर्थः Nyās. i. 886.3 (*on* iv. 1.89); अनुत्पन्नायामेव विभक्तौ एकशेषः Prasā. i. 124. 8; णिच्यनुत्पन्ने इत्यर्थः LaŚabdeŚe. i. 462. 11; **5** not arisen दोषज्ञाने त्वनुत्पन्ने न शङ्क्या निष्प्रमाणता ŚlokaVār. 2.60 (64. 2); 5(2). 187 (263.2); 7. 26 (853.4); कदाचिदप्यनुत्पन्ना ममाद्य मतिरुद्धता PadmP.(Ra.) 37.148; अनुत्पन्नं ज्ञानं यदि … परिचर वसिष्ठस्य चरणौ MahāvīC. 3.36; शब्दशक्तिज्ञानं तत्कथमिवानुत्पन्नं प्रयोगकाले व्यवस्थाकारणत्वेनाश्रयितुं युक्तम् TantrVā. 275.14 (*on* i. 3. 26); 292.9 (*on* i. 4.3); उत्पन्नस्य … अबाध्यमानत्वान्नानुत्पन्नं भ्रान्तं वा इति शक्यं वक्तुम् AitUBh. 243.18 (*on* 1.6); बोधे …। अनुत्पन्ने च नितरां प्रवृत्तेर्हेत्वसंभवात् BṛĀraUBhVā.(Sambandha.) 663; नानुत्पन्नमतो ज्ञानम् BṛĀraUBhVā. i. 4. 747; NaiṣkaSi. 198. 4; अनुत्पन्ने एवैकत्वावभास उत्पन्नभ्रमः PañcPā. 7. 13 (*on* i. 1. 1); इदं रूप्यमित्येकत्वज्ञाने सामानाधिकरण्येनानुत्पन्नेऽप्युत्पन्न इव व्यवहरति लोकः IṣṭaSi. 42.12; 309. 15; अर्थान्तरकल्पनायामनुत्पन्नायां यः संशयं कंचिदापादयितुमलम् PrakaPañ. 274.21; इन्द्रियज्ञानस्यैवं प्रलीनमनुत्पन्नं च ज्ञातुमशक्यमिति वितर्कयति TattvPradī.(A.) 52.10 (*on* 1. 39); उत्पन्नायामेव बुद्धावर्थो ज्ञात इत्युच्यते नानुत्पन्नायाम् Kāśi. ii. 185. 12 (*on* 5(3). 234); प्रागेव तावदर्थग्रहणाज्ज्ञानोत्पत्तिर्भवतामिष्टा, अनुत्पन्नस्य ग्राहकत्वायोगात् NyāyRa. 276.14 (*on* 5(3). 28); अनुत्पन्नस्यातदाकारस्य च ज्ञानस्य सर्वार्थान् प्रत्यविशेषात्, नैवम् PramāMī. 20. 18 (*on* i. 1.25); SyādvāMañ. 16(152)

**अनुत्पन्नऋतु** (anutpanna-ṛtu) *adj.* in whom menstrual discharge has not appeared or commenced (कन्या) दशवर्षादधः शुभा। अनुत्पन्नऋतुर्वापि तां प्रयत्नेन पूजयेत् PadmP. iv. 100.66.

**अनुत्पन्नकल्प** (anutpanna-kalpa) *adj.* almost not originated उत्कृष्टधर्मफलावाप्तौ स्वल्पमधर्मफलमुत्पन्नमप्यनुत्पन्नकल्पं भवतीत्यर्थः Pradī. i. 75B.21 (*on* i. 1. 0)

**अनुत्पन्नकाम** (anutpanna-kāma) *adj.* in whom desire has not arisen, devoid of any desire काम्ये त्वनुत्पन्नकामोऽधिकृत एव न भवति NyāyMañ. ii. 90. 15.

**अनुत्पन्नकायारण्य** (anutpanna-kāyāraṇya) *adj.* for whom the wilderness in the form of body has not come into being कथमेकेन जनुषा विना समाधिमनुत्पन्नकायारण्यः … सुकृतदुष्कृतानि भुञ्जीत AmṛUda. 5. 9(12)

**अनुत्पन्नकार्यपण्डित** (anutpannakārya-paṇḍita) *adj.* wise in dealing with events which have not (yet) taken place or occurred अनुत्पन्नकार्यपण्डितो रुमण्वान् क गतः PratiYau. 1. 5(19)

**अनुत्पन्नक्रिय** (anutpanna-kriya) *adj.* in which action has not begun, devoid of action योऽसौ गन्तव्यो देशः स यथाभूत एवानुत्पन्नक्रिये फले तथा तथाभूत एवोत्पन्नक्रिय इत्यभेदान्नाध्वा कालव्यक्तिहेतुः NyāyVār. 256.6 (*on* ii. 1.38); न केवलमुत्पन्नक्रियेषु क्रियोपरतौ द्रव्योत्पादः क्वचिदनुत्पन्नक्रियेष्वपि द्रव्येषु